योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः २०९

नवाधिकद्विशततमः सर्गः २०९

श्रीवसिष्ठ उवाच ।

एकस्य जीवितं पुंसः सुहृदा मरणं द्विषा ।

मृत्वार्थितं प्रयागादौ क्षेत्रे यत्तदिदं श्रृणु ।। १

क्षेत्राणामर्थधर्माणां सर्वेषां प्रति तं फलम् ।

ब्रह्मणा कल्पितं सर्गे स्वके संकल्पपत्तने ।। २

यत्र पुण्यं यदर्थं च क्षेत्रं ताभ्यां तथा कृतम् ।

यदि तद्विनियोज्यस्य तस्योन्नमति निष्कृतात् ।। ३

तत्तस्मान्महतः पापाद्भागमेनोखिलं च वा ।

चितिशक्त्यात्म तत्पुण्यं परिभ्राम्योपशाम्यति ।। ४

विनेयपापमल्पं चेत्क्षेत्रधर्मोऽधिकस्ततः ।

तत्पापं नाशयित्वा तच्छब्द एव विवल्गति ।। ५

क्षेत्रधर्मेण तेनास्य विनेयस्य महीपते ।

द्वे शरीरे विदौ सम्यक्कचतः प्रतिभात्मिके ।। ६

इत्येवमादिपापानां पुण्यानां च फलं महत् ।

ब्रह्मसंकल्पकचितं यथा यद्यत्तथैव तत् ।। ७

ब्रह्मोच्यतेऽसौ चिद्धातुः सोऽब्जजाद्यहमादि च ।

स यथास्ते तथा तत्तत्तस्य संकल्पनं जगत् ।। ८

प्रतिभैव विनेयस्य क्षेत्रपुण्येन तादृशी ।

तथैवोदेति सा धातुर्विपरीतवतो यथा ।। ९

एकात्मनाहमद्यैष मृतोऽमी मम बन्धवः ।

रुदन्तीमे परं लोकं प्राप्तोऽयमहमेककः ।। १०

बन्धूनामपि तत्रैव तदैवास्य तथैव च ।

प्रतिभा तादृशैवेति धातुक्षोभवतामिव ।। ११

अत्युग्रैः पुण्यपापैः स्वैर्वा महात्मभिरीक्षिते ।

लक्ष्याण्यप्यन्यथा सन्ति नृणां चित्कल्पनावशात् ।। १२

अचेतनं शवीभूतं तेऽपि पश्यन्ति तं मृतम् ।

रुदन्ति तं च दहने क्षिपन्ति सह बान्धवैः ।। १३

विनेयः स यथान्येन संविद्रूपेण देहिना-।

ऽजरामरणमात्मानं वेत्ति स्थितमदुःखितम् ।। १४

यथास्थितेन देहेन वेत्त्यसौ जीवितस्थितम् ।

मृतिं त्वदृश्येनान्येन क्षेत्रपुण्यविदेरितः ।। १५

आविला संविदा संविच्छून्यया वेद्यते क्षणात् ।

न हि सन्नद्धगात्रस्य क्लेशोऽसन्नद्धमेदने ।। १६

पश्यन्ति बन्धवोऽप्येनं तथैवामरतां गतम् ।

द्वयमित्येष लभते जीवितं मरणं समम् ।। १७

इदमप्रतिघारम्भं भ्रान्तिमात्रं जगत्त्रयम् ।

न संभवति को नाम भ्रान्तौ भ्रान्तिविपर्ययः ।। १८

संकल्पस्वप्नपुरयोर्या भ्रान्तिरनुभूयते ।

ततोऽधिकोऽयं न न्यूनाज्जाग्रत्स्वप्नेऽनुभूयते ।। १९

राजोवाच ।

धर्माधर्मौ कथं ब्रह्मन्कारणं देहसंविदः ।

तस्यामूर्तौ कथं चैको द्विशरीरत्वमृच्छति ।। २०

श्रीवसिष्ठ उवाच ।

संकल्पनगरे ब्राह्मे जगत्यस्मिन्महामते ।

किं नाम नो संभवति सत्यं वाप्यसमञ्जसम् ।। २१

यथैव संकल्पपुरे यन्न संभवतीह हि ।

तन्नास्त्येव तदेतस्मिन्किं वाऽस्तु ब्रह्मकल्पने ।। २२

स्वप्नसंकल्पपुरयोरेको गच्छति लक्षताम् ।

तथा चैकैव चित्स्वप्ने सेनात्वमुपगच्छति ।। २३

सहस्राण्येकतां यान्ति तथा सैव सुषुप्तकम् ।

अन्यथा स्वप्नसंकल्पसेनानुभवसंस्मृतौ ।। २४

संकल्पस्वप्नपुरयोरिति को नानुभूतवान् ।

संविदाकाशमात्रेऽस्मिञ्जगत्यनुभवात्मनि ।। २५

तस्मादस्मिंश्चिदाकाशसंकल्पे जगदात्मनि ।

न संभवति किं नाम तत्संभवति वापि किम् ।। २६

एवमेवमियं भ्रान्तिर्भाति भास्वन्नभोमयम् ।

नेह किंचन सन्नासन्न वाऽऽसदिह किंचन ।। २७

यथानुभूयते यद्यत्तत्तथा तत्त्वदर्शिनः ।

प्रबुद्धस्यात्र किं नाम तत्स एवाङ्गतेत्यलम् ।। २८

इह चेद्विहितो धर्मस्तत्स्वर्गेऽमृतपर्वताः ।

स्थिता इतीह संकल्पे कस्मान्न प्राप्तवान्गिरीन् ।। २९

इह यत्क्रियते कर्म तत्परत्रोपभुज्यते ।

इतीह संकल्पपुरे सर्वमेवासमञ्जसम् ।। ३०

यदि स्यात्सुस्थिरं किंचिद्वस्तु तद्दृश्यको भवेत् ।

न्याय एषोऽखिलः किंतु संवित्त्वात्स्वस्वकं स्थितः ।। ३१

इत्येष कथितो न्यायः सिद्धास्वनुभवस्ततः ।

यतो जगन्ति संकल्पश्चितो ब्रह्मस्वरूपतः ।। ३२

इव संकल्पनगरे नास्त्येवासंभवो यथा ।

सर्वार्थानां तथा ब्राह्मे संकल्पे नास्त्यसंभवः ।। ३३

यद्यथा कल्पितं तत्र यावत्संकल्पमेव तत् ।

स्वभावेन तथैवास्ति यतस्तत्संनिवेशवत् ।। ३४

ततः संप्रेक्षणमिह संकरो न प्रवर्तते ।

विनान्यच्चित्प्रयत्नेन भवत्यर्थस्तु नान्यथा ।। ३५

आकल्पमजसंकल्पे यथा भातं जगत्स्थितम् ।

पुनरन्येन संकल्परूपेणान्यदुपैष्यति ।। ३६

संकल्पात्म स्वयं भाति कल्पे कल्पे जगत्तथा ।

प्रतिजीवं चितिस्वप्ने स्वप्ने स्वाप्नपुरं यथा ।। ३७

संकल्पपत्तनतनोर्न तदस्ति किंचि-

द्यद्यन्न संभवति तच्च चिदात्मनोऽस्मात् ।

नान्यत्प्रकम्पयितुराद्यपरस्वरूपा-

द्ब्रह्मैव तेन सकलं जगदङ्ग विद्धि ।। ३८

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वा० उ० महा० सर्वास्तित्वानुभूतिदर्शनं नाम नवाधिकद्विशततमः सर्गः ।।२०९।।